अथ शिवधर्माख्यस्योपपुराणस्य शान्तिकाध्यायः प्रारभ्यते

॥ श्रीगणेशाय नमः ॥

अथ शिवधर्माख्यस्योपपुराणस्य शान्तिकाध्यायः प्रारभ्यते

अतः परमिदं गुह्यं रुद्रोद्गीतं महोदयम् । महाविघ्न-प्रशमनं महाशान्तिकरं शुभम् ॥ १॥ अकालमृत्युशमनं सर्वव्याधिनिवारणम् । परचक्रप्रमथनं सदा विजयवर्धनम् ॥ २॥ सर्वदेवग्रहानीकं समभीष्टफलप्रदम् । सर्वशान्ताधिकाराख्यं धर्मं वक्ष्यामि शाश्वतम् ॥ ३॥ शशाङ्कार्द्धधरस्त्र्यक्षो नागयज्ञोपवीतकः । चतुर्मुखश्च-तुर्बाहुः सितभस्माऽवगुण्ठितः ॥ ४॥ वरो वरेण्यो वरदो देवदेवो महेश्वरः। त्रैलोक्यनमितः श्रीमाञ्छान्तिमाशु करोतु मे ॥ ५॥ सर्वावयवपूर्णेन गात्रेण तनुमध्यमा।

चतुर्थ-शिव-धर्माख्यं साक्षान्नन्दीश-भाषितम्—इति कूर्मपुराणस्य प्रमाणं वीरमित्रोदयस्य परिभाषा-प्रकाशे प्रतिपादितत्वाच्चतुर्थे उपपुराणे शिवधर्माख्ये एषः शान्तिकाध्यायो वर्तते ॥

पीतश्यामातिसौम्येन स्निग्धवर्णेन शोभना ॥ ६॥ ललाटे तिलकोपेता चन्द्ररेखार्ध-धारिणी। चित्राम्बरधरा देवी सर्वाऽऽभरणभूषिता॥ ७॥ वरस्त्रीमयरूपेण शोभागुण-महास्पदा। भावनामात्रसन्तुष्टा उमादेवी वरप्रदा ॥ ८॥ साक्षादागत्य रूपेण शान्तेनाऽमिततेजसा। शान्तिं करोतु मे प्रीता भक्तानां भक्तवत्सला ॥ ९॥ पद्मरागद्युतिः सौम्यो रक्तमाल्याऽनुलेपनः । अबालो बालरूपेण षड्वक्त्रः शिखिवाहनः ॥ १०॥ पूर्णेन्दुवदनः सौम्यस्त्रिशिखः शक्तिसंयुतः। कृत्तिको-माग्निरुद्रांशसमुद्भूतः सुरार्चितः ॥ ११॥ कार्त्तिकेयो महातेजा वरदानैकतत्परः। शान्तिं करोतु मे नित्यं वरं सौख्यं च मे सदा ॥ १२॥ श्वेतवस्त्रपरीधानस्त्र्यक्षः कनकसुप्रभः। रुद्रश्चैको महायौगी रुद्रैको हितमानसः ॥ १३॥ शूलपाणिर्महाप्राज्ञो नन्दीशः शिवभावितः । शिवार्चनपरो नित्यः शिवध्यानैकतत्परः ॥ १४॥ शान्तिं करोतु मे शान्तो धर्मे च मतिमुत्तमाम् । महादेवो महाकायः

स्निग्धाञ्जनचयच्छविः ॥ १५॥ एकदंष्ट्रोत्कटो देवो गजवक्त्रो महाबलः। नागयज्ञोपवीती च नागाऽऽभरणभूषितः ॥ १६॥ सर्वार्थसंपदाधारो गणाध्यक्षो वरप्रदः। इन्द्रस्य तनयो देवो नायकोऽथ विनायकः ॥ १७॥ करोतु मे महाशान्तिं कर्मसिद्धिं च सर्वदा। इन्द्रनीलनिभस्त्र्यक्षो दीप्तशूलाऽऽ युधोद्यतः ॥ १८॥ रक्ताम्बर-धरः श्रीमान् कृष्णाङ्गो नागभूषणः। पापाऽपनोदमतुलमलक्ष्मीमलनाशनः ॥ १९॥ करोतु मे महाशान्तिं महाकालो महाबलः। पीतवस्त्रपरीधाना कन्यारूपा स्वलङ्-कृता ॥ २०॥ गणमाताऽम्बिका त्र्यक्षा पुण्या शान्ता सुरेश्वरी। सर्वसिद्धिकरी देवी प्रसादपरमा परा॥ २१॥ शान्तिं करोतु मे माता सिद्धिं चाऽनुप्रयच्छतु। स्निग्धश्यामेन वर्णेन महामहिष-मर्दिनी ॥ २२॥ धनुश्चक्रप्रहरणा खड्गपट्टिश-धारिणी। आतर्जन्युद्यतकरा सर्वोपद्रवनाशिनी ॥ २३॥ सर्वमङ्गलदात्री मे शिवमाचरतु ध्रुवम् । निर्मांसेन शरीरेण स्नाय्वस्थिषु निबन्धनः ॥ २४॥ अति-

सूक्ष्मोऽतिविक्रान्तस्त्र्यक्षो भृङ्गिरिटिर्महान् । रुद्रात्मको महावीरो रुद्रैकाहित-मानसः ॥ २५ ॥ सोऽपि मे शान्तिभावेन शान्तिमाशु प्रयच्छतु। प्रचण्डगणसैन्येशो महाटङ्काक्षधारकः ॥ २६ ॥ अक्षमालार्पितकरस्त्र्यक्षश्चण्डेश्वरो वरः। चण्डस्ता-पापहरणो ब्रह्महत्यादिशोधकः ॥ २७ ॥ करोतु मे महायोगी कल्याणानां परम्पराम्। शङ्खकुन्देन्दुतुल्याभः कण्ठे मरकतप्रभः ॥ २८ ॥ अक्षमाली शिखाग्रस्थः स्वयं ज्ञानव्यवस्थितः । चतुर्मुखश्चतुष्पादस्त्रिनेत्रः सर्वदोज्ज्वलः ॥ २९ ॥ क्षितेः पतिर्वृषो देवो धर्मो धर्मतमो मतः। ईशं वहति पृष्ठेन तस्माद्धर्मो जगत्प्रभुः ॥ ३० ॥ वृषो वृषवरः श्रीमान् करोतु मम शान्तिकम् । पद्मासनः पद्मनिभश्चतुर्वदन-पङ्कजः ॥ ३१ ॥ कमण्डलुधरः श्रीमान् देवगन्धर्वपूजितः। शिवध्यानैकपरमः शिवसद्भावभावितः ॥ ३२ ॥ ब्रह्मशब्देन दिव्येन ब्रह्मा शान्तिं करोतु मे। ताक्ष्यासनश्चतुर्बाहुः शङ्खचक्रगदाधरः ॥ ३३ ॥ श्यामः पीताम्बरधरो

महाबलपराक्रमः। यज्ञदेवोत्तमो देवो माधवो मधुसूदनः ॥ ३४॥ शिवप्रसादसम्पन्नः शिवध्यानपरायणः । सर्वपापप्रमथनः सर्वाऽसुरनिकृन्तनः ॥ ३५॥ सर्वदा शान्तभावेन विष्णुः शान्तिं करोतु मे। अर्हन्तः शान्तरूपी च पिच्छि–स्कन्धैकपाणिकः ॥ ३६॥ दिग्वासा मत्तपङ्कश्च सौम्यचित्तः समाहितः। संवृत्तलोचनः शान्तः शिवज्ञानैकचिन्तकः ॥ ३७॥ शान्तिं करोतु मे शान्तः शिवयोगेन भावितः। जितेन्द्रियः समाधिस्थः पात्रचीवरभूषितः ॥ ३८॥ वरदाभयपाणिश्च ज्ञानध्यानरतः सदा। योगवृष्टिसमायुक्तः शिवभानेन भावितः ॥ ३९॥ शान्तिं करोतु मे देवः सर्वसत्त्वहिते रतः । पीतवर्णेन देहेन हारेण सुविचित्रितः ॥ ४०॥ सर्वाङ्गसुन्दरी देवी विजया जयकारिणी। शिवाऽर्चनरता नित्यं शिवजाप्यपरायणा॥ ४१॥ धरित्री लोकमाता च नित्यं रक्षां करोतु मे। नन्दा भद्रा च सुरभिः सुशीला सुमनास्तथा ॥ ४२॥ क्षीरोदादुत्थिता गावो

लोकानां हितकाम्यया। प्रीणयन्ति सदा देवान् विप्राँश्चैवाऽविशेषत: ।। ४३।। नित्यं च देवतात्मान: कुर्वन्तु मम शान्तिकम् । पद्मरागप्रभा देवी चतुर्वदन-पङ्कजा ।। ४४।। अक्षमालार्पितकरा कमण्डलुधरा शुभा। ब्रह्माणी सौम्यवदना शिवपूजापरायणा ।। ४५।। शान्तिं करोतु मे प्रीता ब्रह्मशब्देन सर्वदा। हिमशैलनिभा देवी महावृषभवाहिनी ।। ४६।। त्रिशूलहस्ता वरदा नानाऽऽभरणभूषिता। चतुर्भुजा चतुर्वक्त्रा त्रिनेत्रा पापहारिणी।। ४७।। आर्तिं हरतु मे माता रुद्राणी नित्यमुज्ज्वला। मयूरवाहना देवी सिन्दूरारुणविग्रहा ।। ४८।। शक्तिहस्ता महारूपा सर्वाऽ-लङ्कारभूषिता। रुद्रभक्ता महावीर्या रुद्रार्चनरता सदा।। ४९।। कौमारी वरदा देवी शान्तिमाशु करोतु मे। खड्गचक्रगदाहस्ता श्यामा पीताम्बरप्रिया ।। ५०।। चतुर्भुजा तार्क्ष्ययाना वैष्णवी सुरपूजिता। शिवार्चनपरा नित्यं शिवैकाहितमानसा।। ५१।। शान्तिं करोतु मे नित्यं सर्वाऽसुरविमर्दिनी। ऐरावतगजारूढा वज्रहस्ता महा-

बला।। ५२।। नेत्राणां तु सहस्रेण भूषिता कनकप्रभा। सिद्धगन्धर्वनमिता सर्वालङ्कारभूषिता ।। ५३।। ऐन्द्री देवी सदाकालं शान्तिमाशु करोतु मे । वाराह-घोरा विकटा वराहवरवाहना ।। ५४।। श्यामावदाता विपुला शङ्खचक्रगदायुधा। तर्जयन्ती सदा विघ्नान्नर्चयन्ती सदाशिवम् ।। ५५।। वाराही वरदा देवी क्षेमारोग्ये ददातु मे। ऊर्ध्वकेशा कोटराक्षी निर्मांसा स्नायुबन्धना ।। ५६।। करालवदना घोरा खड्गकट्टारकोद्यता। कपालमालिनी क्रुद्धा खट्वाङ्गवरधारिणी।। ५७।। आरक्तपिङ्गनयना गजचर्माऽवगुण्ठिता। नानानागोपवीताङ्गी प्रेतस्थान-निवा-सिनी ।। ५८।। शिवरूपेण घोरेण शिवरावभयङ्करी। चामुण्डा चण्डरूपेण महारक्षां करोतु मे ।। ५९।। अपीतेन शरीरेण सर्वाऽऽभरणभूषिता। आतर्जयन्ती विघ्नानि ज्वलत्खट्वाङ्गधारिणी ।। ६०।। ध्वाङ्क्षासना महावीरा सर्वपापप्रणाशिनी। लम्बोष्ठी वरदा देवी शान्तिमाशु करोतु मे ।। ६१।। आकाशमातरी

दिव्यस्तथाऽन्यालोकमातरः । भूतानां मातरः सर्वास्तथाऽन्येषाञ्च मातरः।। ६२।। सर्वमातृमहादेव्यः स्वायुधा व्यग्रपाणयः। जगद्व्याप्याऽवतिष्ठन्ते बलिकामा महोदयाः ।। ६३।। रुद्रभक्ता महावीर्या रुद्रार्चाऽहितमानसाः । शान्तिं कुर्वन्तु मे नित्यं मातरः सुरपूजिताः ।। ६४।। ये रुद्रा रौद्रकर्माणो रुद्रस्थाननिवासिनः। सौम्याश्चैव तु ये केचित् स्थाणुस्थाननिवासिनः ।। ६५।। मातरो रुद्ररूपाश्च गणानामधिपाश्च ये। विघ्नभूतास्तथा चाऽन्ये दिवि दिक्षु समाश्रिताः ।। ६६।। सर्वे सुप्रीतमनसः प्रतिगृह्णन्तु मे बलिम्। सिद्धिमाशु प्रयच्छन्तु भयेभ्यः पान्तु मां सदा ।। ६७ ।। ऐन्द्र्याम् दिशि गणा ये तु वज्रहस्ता महाबलाः । सुश्वेताक्षाः श्वेतनिभास्तथा वै श्वेतलोहिताः ।। ६८ ।। दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः । रुद्रार्चनरता हृष्टा शान्तिं कुर्वन्तु मे सदा ।। ६९।। आग्नेय्यां ये गणाः सर्वे शक्तिहस्ता निषङ्गिणः । आरक्ताक्षा रक्तनिभास्तथा

वै रक्तलोहिता: ॥ ७०॥ दिव्यान्तरिक्षभौमाश्च पातालतलवासिन: । रुद्र-प्रणाम-मनस: शान्तिं कुर्वन्तु मे सदा ॥ ७१॥ याम्यां दिशि गणा ये तु सततं दण्डपाणय:। कृष्णा: कृष्णनिभा: क्रुद्धास्तथा वै कृष्णलोहिता: ॥ ७२ ॥ दिव्यान्तरिक्षभौमाश्च पातालतलवासिन: । रुद्रका हितचेतस्का: शान्तिं कुर्वन्तु मे सदा ॥ ७३॥ नैर्ऋत्यां तु गणा: क्रूरा राक्षसा मृत्युरूपिण: । सुनीलाक्षा नीलनिभास्तथा वै नीललोहिता: ॥ ७४॥ दिव्यान्तरिक्षभौमाश्च पातालतलवासिन: । रुद्रध्यानैक निरता: शान्तिं कुर्वन्तु मे सदा ॥ ७५॥ वारुण्यां वै गणा ये तु सततं पाशपाणय: । सुश्यामाक्षा: श्यामनिभास्तथा वै श्यामलोहिता: ॥ ७६॥ दिव्यान्तरिक्ष-भौमाश्च पातालतलवासिन:। परमेशार्चनरता: कुर्वन्तु मम शान्तिकम् ॥ ७७॥ वायव्यां वै गणा ये तु सततं ध्वजपाणय: । सुपीताक्षा: पीतनिभास्तथा वै

पीतलोहिताः ।। ७८।। दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः । शिवभक्ति-
पराः सर्वे क्षेमं कुर्वन्तु मे सदा।। ७९।। उत्तरस्यां गणा ये तु सततं निधिपाणयः।
शबलाक्षाः शबलभास्तथा शबललोहिताः ।। ८०।। दिव्यान्तरिक्षभौमाश्च पाताल-
तलवासिनः। शिवपूजासमुद्युक्ताः क्षेमं कुर्वन्तु सर्वदा ।। ८१।। ऐशान्यां वै गणा
ये तु प्रशान्ताः शूलपाणयः । सूक्ष्माः सुसूक्ष्मसदृशास्तथा वै सूक्ष्मलोहिताः ।। ८२।।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः। शिवपूजासमुद्युक्ताः क्षेमं कुर्वन्तु मे
सदा ।। ८३।। अधोभागे गणा ये तु सततं शूलपाणयः। धूम्रा धूम्रनिभाः सर्वे
तथा वै धूम्रलोहिताः ।। ८४।। दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।
शिवं कुर्वन्तु मे नित्यमलक्ष्मीमलनाशनम् ।। ८५ ।। ऊर्ध्वभागे गणा ये तु
महाबलपराक्रमाः। सुसूक्ष्माक्षाः सूक्ष्मनिभास्तथा वै सूक्ष्मलोहिताः ।। ८६।।

दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः । शिवपूजासमुद्युक्ता अशुभान्नाशयन्तु मे ।। ८७।। एते गणा महात्मानो महाबलपराक्रमाः । शिवं सम्पूज्य यत्नेन बलिं तेषां विनिक्षिपेत् ।। ८८।। ततः सुप्रीतमनसः शान्तिं कुर्वन्तु सर्वदा। अमरावती नाम पुरी पूर्वभागे व्यवस्थिता ।। ८९।। विद्याधरसमाकीर्णा सिद्धगन्धर्व-सेविता। रत्नप्रकाररुचिरा सर्वरत्नोपशोभिता ।। ९०।। तत्र देवपतिः श्रीमान् वज्रपाणिर्महाबलः। नेत्राणां तु सहस्रेण शोभनेन विराजते ।। ९१।। ऐरावतगजारूढो हेमवर्णो महाद्युतिः । देवेन्द्रः सततं हृष्टः परमेशार्चने रतः ।। ९२।। शिवध्यानेन सम्पन्नः शिवभक्तिसमन्वितः। शिवप्रणामपरमः करोतु मम शान्तिकम् ।। ९३।। आग्नेये दिग्विभागे तु पुरी तेजोवती शुभा । नानादेवगणाकीर्णा रत्नज्वा-लासमुज्ज्वला ।। ९४।। तत्र ज्वालापरीताङ्गी दीप्ताङ्गारसमद्युतिः । भूतिकृद्

देहिनां देवो ज्वलनः पापनाशनः ॥ ९५ ॥ शिवपूजाजपोद्युक्तः शिवस्मरणभावितः।
शान्तिङ्करोतु मे देवस्तथा पापपरिक्षयम् ॥ ९६ ॥ वैवस्वती नाम पुरी दक्षिणे वै
व्यवस्थिता । सुरासुरशतानीकपितृरक्षोगणालया ॥ ९७ ॥ तत्रेन्द्रो नीलसंकाशो
रक्तान्तायतलोचनः। महामहिषमारूढः कृष्णस्रग्वस्त्रभूषणः ॥ ९८ ॥ अन्तकोऽथ
महातेजाः शिवधर्मपरायणः । शिवपूजासमुद्युक्तः क्षेमारोग्ये ददातु मे ॥ ९९ ॥
नैर्ऋत्यास्तु दिशो भागे पुरी कृष्णेति विश्रुता । महारक्षोगणैः कीर्णा पिशाचभूतसं-
कुला ॥ १०० ॥ तत्र जीमूतसंकाशो रक्तस्रग्वस्त्रभूषणः। खड्गपाणिर्महातेजाः
करालवदनोज्ज्वलः ॥ १०१ ॥ रक्षोगणेन्द्रो निर्ऋतिः शिवार्चनरतः सदा। करोतु
मे महाशान्तिं शिव-भक्तिसमुत्सुकः ॥ १०२ ॥ पश्चिमे तु दिशो भागे पुरी
शुद्धावती शुभा। नानागणसमाकीर्णा नानाकिन्नरशोभिता ॥ १०३ ॥ तत्र

मौक्तिकसङ्काश: परिपिङ्गललोचन: । शुक्लवस्त्रपरीधान: पाशहस्तो महा-
बल:।। १०४।। वरुण: परया भक्त्या शिवैकाहितमानस: । रोगशोकार्तिसन्तापं
नित्यं नाशय मे ध्रुवम् ।।१०५।। वायव्ये दिग्विभागे तु पुरी गन्धवती शुभा।
ऋषिसिद्धगणाऽऽकीर्णा हेमप्राकारतोरणा ।।१०६।। तत्र ताम्रेण देहेन कृष्णपिङ्गल-
लोचन:। पटव्याप्तान्तरालीनो ध्वजयष्ट्यायुधोद्यत: ।। १०७।। पवन: परमो
देव: परमेश्वरभावित:। क्षमारोग्ये बलं शान्तिं करोतु सततं मम ।। १०८।।
महोदया नाम पुरी उत्तरेण महोज्ज्वला । अनेकयक्षसङ्कीर्णा नानारत्नोप-
शोभिता ।।१०९।। तत्र देवो गदाहस्त: शुचिस्त्रग्वस्त्रभूषण:। ह्रस्वबाहुर्महातेजा:
परिपिङ्गललोचन: ।। ११०।। कुबेरो वरद: श्रीमान् हरपादार्चने रत: । शान्तिं
करोतु मे शान्त: प्रीत: प्रीतेन तेजसा ।। १११।। यशोवती पुरी रम्या ऐशानीं

दिशमाश्रिता। नानागणसमाकीर्णा नानासुरकृतालया ॥११२॥ तेज: प्राकारपर्यन्ता निरौपम्या महोदया। तत्र मौक्तिकसङ्काश: शशाङ्ककृतभूषण: ॥११३॥ त्रिनेत्र: शान्तरूपात्मा अक्षमालाधर: सदा। ईशान: परमो देव: सर्वदेवोत्तमोत्तम: ॥११४॥ सोऽपि सर्वात्मभावेन शान्तिमाशु प्रयच्छतु। भूर्लोकेऽथ भुवर्लोके स्वर्लोके निवसन्ति ये ॥११५॥ देवा दिव्यप्रभायुक्ता: शान्तिं कुर्वन्तु मे सदा। जनलोके महर्लोके तपोलोके स्थिताश्च ये ॥११६॥ तेऽपि प्रमुदिता देवा: शिवं कुर्वन्तु मे सदा। सत्यलोके च ये देवा: प्रभावोज्ज्वलविग्रहा: ॥११७॥ शिवभक्ता: सुमनसो भयं निर्णाशयन्तु मे। गिरिकन्दरदुर्गेषु वनेषु निवसन्ति ये ॥११८॥ रुद्रार्चनपरा देवा रक्षां कुर्वन्तु मे सदा। महातले च ये सन्ति संस्थिताश्च रसातले ॥११९॥ तलातले च ये सन्ति उत्तमा: सुतले जना:। वितले संस्थिता:

भूता अतले निवसन्ति ये ॥१२०॥ तले च निलयो येषां रक्षां कुर्वन्तु सर्वदा। शरच्चन्द्रांशुगौरेण देहेनाऽमलतेजसा ॥१२१॥ सरस्वती शिवा भक्ता शान्तिमाशु करोतु मे। चारुचामीकरच्छाया सरोजकरपल्लवा ॥ १२२॥ शिवभक्ता च श्रीर्देवी श्रीसद्भूतिं ददातु मे। चारुणा मुखचन्द्रेण विचित्रकुसुमोज्ज्वला ॥१२३॥ जया देवी शिवे भक्ता सर्वं कामं ददातु मे। हारेण सुविचित्रेण भास्करोज्ज्वल-तेजसा ॥ १२४॥ रुद्रस्तुता परा रम्या करोतु विजयं मम। सिन्दूररागरक्तेन वर्णेनाऽऽयतलोचना ॥ १२५॥ सहस्रकिरणः श्रीमान् सप्ताश्वकृतवाहनः । गभस्तिमाली भगवाञ्शिवपूजापरायणः ॥१२६॥ करोतु मे महाशान्तिं ग्रहपीडा-निवारणम्। जगदाप्यायनकरो ह्यमृताधारशीतलः ॥ १२७॥ सोमः सौम्येन भावेन ग्रहपीडां व्यपोहतु। पद्मरागनिभाङ्गेन करिपिङ्गललोचनः ॥१२८॥ अङ्गारकश्च

मे नित्यं ग्रहपीडां व्यपोहतु। कुंकुमच्छविदेहेन चारुद्युत्करतः सदा।। १२९।।
शिवभक्तो बुधः श्रीमान् ग्रहपीडां व्यपोहतु। धातु चामीकरच्छायः सर्वज्ञान-
कृतालयः ।।१३०।। बृहस्पतिः सदाकालमीशानार्चनतत्परः। सोऽपि मे शान्तचित्तेन
परमेण समाहितः।। १३१।। ग्रहपीडां विनिर्जित्य करोतु विजयं सदा।
हिमकुन्देन्दुतुल्याभः सुरदैत्येन्द्रपूजितः ।।१३२।। शुक्रः शिवार्चनरतो ग्रहपीडां
व्यपोहतु। भिन्नाञ्जनचयच्छायः सरक्तनयनद्युतिः।। १३३।। शनैश्चरः शिवे
भक्तो ग्रहपीडां व्यपोहतु। नीलाञ्जननिभः श्रीमान् सैंहिकेयो महाबलः ।।१३४।।
शिवपूजापरो राहुर्ग्रहपीडां व्यपोहतु। धूम्राकारो ग्रहः केतुरैशान्यां दिशि
संस्थितः ।।१३५।। वर्तुलोऽतीव विस्तीर्णलोचनैश्च विभीषणः। पलाशधूम्रसंकाशो
ग्रहपीडाऽपकारकः ।। १३६।। घोरदंष्ट्राकरालश्च करोतु विजयं मम। खड्ग-
खेटकहस्तश्च वरेण्यो वरदः शुभः ।। १३७।। शिवभक्तश्चाऽग्रजन्मा ग्रहपीडां

व्यपोहतु। एते ग्रहा महात्मानो महेशार्चनभाविताः ॥१३८॥ शान्तिं कुर्वन्तु मे हृष्टाः सदाकालं हितैषिणः। मुखे यस्याः स्थितो मृत्युर्विष्टिर्नाम महाबलः ॥१३९॥ सम्मुखे विघ्नकर्त्री च पुच्छे तु विजयङ्करी। तृतीया सप्तमी चैव दशमी च चतुर्दशी ॥१४०॥ चतुर्थी ह्यष्टमी चैव एकादशी च पूर्णिमा। एतेषु विघ्नपातेषु कृष्णशुक्लसमाह्वयाः ॥१४१॥ कुर्वन्तु मे लब्ध-वराः शान्तिं मे परमेप्सितान्। अमावस्या महापुण्या पितृदेवसमन्विता ॥ १४२॥ शांतिश्च परमां पुण्यां शिवस्य परमात्मनः। शिवतेजः समायुक्ता करोतु विजयं मम ॥ १४३॥ प्रतिपच्च महाशान्ता द्वितीया च मनोहरा। तृतीया च तिथिः शान्ता चतुर्थी च महायशाः ॥१४४॥ पञ्चमी नाम शान्तात्मा षष्ठी च तिथिरुत्तमा। सप्तमी च तिथिः पुण्या ह्यष्टमी च महाबला ॥१४५॥ तिथिः शूलभृतश्चैव पापहा परमा स्मृता। नवमी तिथिरत्युग्रा दुर्गायाः परिकीर्तिता ॥ १४६॥ दशमी

शोभना चैव तिथिरेकादशी तथा। द्वादशी चैव शान्तात्मा तथा तिथिस्त्रयोदशी।। १४७।। चतुर्दशी महावीर्या तिथिः शङ्करभाविता। पूर्णिमा परिपूर्णात्मा तिथयः सततोज्ज्वलाः ।। १४८।। सततं च शुभात्मानस्तिथयश्च क्रमेण तु। पक्षद्वये सदा ह्येताश्चन्द्रगत्याऽनुगामिनः ।। १४९।। शान्तिं कुर्वन्तु मे नित्यं शिवज्ञानविधायिनः । विष्कुम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा ।।१५०।। अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च। गण्डोवृद्धिः ध्रुवश्चैव व्याघातो हर्षणस्तथा ।। १५१।। वज्रः सिद्धिर्व्यतीपातो वरीयान् परिघः शिवः । सिद्धिः साध्यः शुभः शुक्लो ब्रह्मा ऐन्द्रश्च वैधृतिः ।।१५२।। चन्द्राद्भानोश्च ह्युत्पन्ना योगाश्चैते महाबलाः । शिवभक्तिपराः सर्वे शिवज्ञानविधायिनः।।१५३।। शान्तिं कुर्वन्तु मे नित्यं तथा किल्विषनाशनम् । कृत्तिका परमा देवी रोहिणी रुचिरानना ।। १५४।। श्रीमान् मृगशिरा भद्रा आर्द्रा च परमोज्ज्वला। पुनर्वसुस्तथा

पुष्य अश्लेषाऽथ महाबला ।। १५५।। नक्षत्रमातरो ह्येताः प्रभामालाविभूषिताः। महादेवाऽर्चने शक्ता महादेवाऽनुभावितः ।। १५६।। पूर्वभागे स्थिता ह्येताः शान्तिं कुर्वन्तु मे सदा। मघा सर्वगुणोपेता पूर्वा चैव तु फाल्गुनी ।। १५७।। उत्तरा फाल्गुनी श्रेष्ठा हस्ता चित्रा तथोत्तमा। स्वाती विशाखा वरदा दक्षिणस्थान-संस्थिताः ।। १५८।। अर्चयन्ति सदाकालं देवं त्रिभुवनेश्वरम् । नक्षत्रमातरो ह्येतास्तेजसापरिभूषिताः ।।१५९।। ममाऽपि शान्तिकं नित्यं कुर्वन्तु शिवचोदिताः। अनुराधा तथा ज्येष्ठा मूलमृद्धिबलान्वितम् ।। १६०।। पूर्वाषाढा महावीर्या आषाढा चोत्तरा शुभा। अभिजिन्नाम नक्षत्रं श्रवणः परमोज्ज्वलः ।। १६१।। एताः पश्चिमतो दीप्ता राजन्ते राजमूर्तयः। ईशानं पूजयन्त्येताः सर्वकालं शुभाऽ-न्विताः ।।१६२।। मम शान्तिं प्रकुर्वन्तु विभूतिभिः समन्विताः। धनिष्ठा शतभिषा च पूर्वाभाद्रपदा तथा ।।१६३।। उत्तराभाद्ररेवत्यावश्विनी च महर्धिका। भरणी

च महावीर्या नित्यमुत्तरतः स्थिताः ॥१६४॥ शिवार्चनपरा नित्यं शिवध्याने-
कमानसाः । शान्तिं कुर्वन्तु मे नित्यं सर्वकालं शुभोदयाः ॥ १६५॥ मेषो
वृषाऽधिपः सिंहो धनुर्दीप्तिमतां वरः। पूर्वभागे स्थिता ह्येते शिवपूजा-
परायणाः ॥१६६॥ शान्तिं कुर्वन्तु मे नित्यं शिवभक्तिपरायणाः । वृषश्च कन्या
देवी च मकरश्चाऽपि ऋद्धिमान् ॥१६७॥ एते दक्षिणभागे तु पूजयन्ति सदा
शिवम्। भक्त्या परमया नित्यं शान्तिं कुर्वन्तु मे सदा ॥१६८॥ मिथुनश्च तुला
कुम्भः पश्चिमेन व्यवस्थिताः। शिवपादार्चनरताः क्षेमं कुर्वन्तु मे सदा ॥१६९॥
कर्कटो वृश्चिको मीन एते उत्तरमास्थिताः। पूजयन्ति सदाकालं रुद्रम्भुवन-
नायकम् ॥ १७०॥ शान्तिं कुर्वन्तु मे नित्यं शिवाज्ञाऽनुविधायिनः । बवश्च
बालवश्चैव कौलवस्तैतिलस्तथा॥१७१॥ गरो वणिक् तथा विष्टिश्चतुष्पाच्छकु-
निस्तथा। नागः किंस्तुघ्न इत्येव करणाः शिवभाविताः ॥१७२॥ सर्वे सुप्रीतमनसः
शान्तिं कुर्वन्तु मे सदा। जन्म सम्पद्विपच्चैव क्षेपप्रत्यरिसाधकाः ॥१७३॥ वधो

मैत्रोऽतिमैत्रश्च एते वै तारकागणाः । शिवभक्ताः सुमनसः कुर्वन्तु मम शान्तिकम् ॥१७४॥ ऋषयः सप्तविख्याता ध्रुवान्ताः परमोज्ज्वलाः । शिवप्रसादसंपन्नाः शान्तिं कुर्वन्तु मे सदा ॥१७५॥ कश्यपो गालवो गार्ग्यो विश्वामित्रो महामुनिः। मुनिर्दक्षोवसिष्ठोऽथ मृकण्डुः पुलहः क्रतुः ॥ १७६॥ असितो बालखिल्याश्च दुर्वासाः पिप्पलादयः । ऋचीको भरतोऽगस्त्यः पराशर्यो विभाण्डकः ॥१७७॥ मातङ्गो जैमिनिर्व्यासो देवलो दर्भरोमकः। माण्डव्यश्च दधीचिश्च मार्कण्डेयोऽथ गौतमः ॥१७८॥ नारदो भृगुरात्रेयो भारद्वाजोऽङ्गिरा मुनिः। वाल्मीकिः कौशिकः कण्वः साकलोऽथ पुनर्वसुः ॥१७९॥ सालङ्कायन इत्याद्या ऋषयोऽथ महाव्रताः। शिवध्यानर्चने युक्ताः शान्तिं कुर्वन्तु मे सदा ॥१८०॥ ऋषिपत्न्यो महापुण्यास्तथा ऋषिकुमारिकाः। शिवार्चनपरा नित्यं शान्तिं कुर्वन्तु मे सदा ॥१८१॥ सिद्धाः ससिद्धतपसो गणा विद्याधरा ग्रहाः। महात्मानो महोत्साहा गरुडाश्च महर्द्धिकाः ॥१८२॥ महेश्वरपरा ह्येते महेशं पादपूजकाः । सिद्धिमाशु प्रयच्छन्तु आशीर्वादपरा-

यणाः।।१८३।। नमुचिर्दैत्यराजेन्द्रः शंकुकर्णो महाबलः । महानादोऽथ विख्यातो दैत्यः परमवीर्यवान् ।। १८४।। हाटकेश्वरदेवस्य नित्यं पूजापरायणाः। बलं वीर्यञ्च मे क्षिप्रं प्रयच्छन्तु महर्द्धिकाः ।। १८५।। महाजृम्भो हयग्रीवः प्रह्लादाऽव्यक्तह्लादकः । तारकोऽग्निमुखो दैत्यः कालनेमिर्मदोत्कटः ।।१८६।। एते दैत्या महात्मानः शिवसद्भावभाविताः। पुष्टिं बलं तथा वीर्यं प्रयच्छन्तु सुखोदयम् ।। १८७।। विरोचनो हिरण्याक्षः सुपर्वा च सुलोमकः। मुचुकुन्दः सुकुन्दश्च दैत्यो रैवतकस्तथा ।।१८८।। भावेन च परेणाऽऽशु यजन्ते सर्वदा शिवम्। सततञ्च गुणात्मानं पुष्टिं कुर्वन्तु मे सदा।।१८९।। दैत्यपत्न्यो महाभागा दैत्यानां कन्यकाः शुभाः। कुमाराश्चैव दैत्यानां शान्तिं कुर्वन्तु मे सदा ।।१९०।। आरक्तेन शरीरेण रक्तान्तायतलोचनः । महाभोग- कृतालोपः शङ्खाब्ज-कृतलाञ्छनः ।।१९१।। अनन्तो नागराजेन्द्रः शिवपादार्चने रतः। महापापविषं हत्वा शान्तिमाशु करोतु मे ।।१९२।। सुश्वेतेन तु देहेन सुश्वेतोत्पलशेखरः।

चारुभोगकृताटोपो हारचारुविभूषणः ॥१९३॥ वासुकिर्नाम नागेन्द्रो रुद्रपूजापरो महान्। महापापं विषं हत्वा शान्तिम् आशु करोतु मे ॥१९४॥ अतिपीतेन देहेन विस्फुरद्भोगसंपदा। तेजसा चाऽतिदीप्तेन कृतः स्वस्तिकलाञ्छनः ॥१९५॥ नागराट् तक्षकः श्रीमान्नागकोट्यासमन्वितः । करोतु मे महाशान्तिं सर्वदोषविषावहः ॥१९६॥ अतिकृष्णेन वर्णेन स्फुटो विकटमस्तकः । कण्ठे रेखात्रयोपेतो घोरदंष्ट्रायु-धोद्यतः ॥१९७॥ कर्कोटको महानागो विषदर्पबलाऽन्वितः। विषशस्त्राग्निसन्तापं हत्वा शान्तिं करोतु मे ॥ १९८॥ पद्मवर्णेन देहेन चारुपद्मायतेक्षणः। पञ्चबिन्दुकृताभासो ग्रीवायां शुभलक्षणः॥ १९९॥ ख्यातः पद्मो महानागो हरपादार्चने रतः। करोतु मे महाशान्तिं महापापं विषक्षयम् ॥ २००॥ पुण्डरी-कनिभेनाऽपि देहेनाऽमिततेजसा। शङ्खशूलाब्जरुचिरैर्भूषितो मूर्ध्नि सर्वदा ॥ २०१॥ महापद्मो महानागो नित्यं पशुपतौ रतः । विनिर्धूतविषं घोरं शान्तिमाशु करोतु मे ॥ २०२॥ श्यामेन देहभारेण श्रीमत्कमललोचनः। विषदर्पबलोन्मत्तो

ग्रीवायामेकरेखया।। २०३।। शङ्खपालः श्रिया दीप्तः शिवपादाब्जपूजकः । महाविषं महापापं हत्वा शान्तिं करोतु मे ।। २०४।। अतिघोरेण देहेन चन्द्रार्धकृतमस्तकः । दीप्तभोगकृताटोपः शुभ-लक्षणलक्षितः ।। २०५।। कुलिको नागराजेशो नित्यं हरपरायणः। अपहृत्य विषं घोरं करोतु मम शान्तिकम् ।। २०६।। अन्तरिक्षे च ये नागा ये नागाः स्वर्गसंस्थिताः । गिरिकन्दरदुर्गेषु ये नागा भूमिसंस्थिताः ।। २०७।। पाताले ये स्थिता नागाः सर्वेप्यन्ये समाहिताः। रुद्रपादार्चने शान्ताः कुर्वन्तु मम शान्तिकम् ।। २०८।। नागिन्यो नागपत्न्यश्च तथा कन्याः कुमारिकाः । शिवभक्ताः सुमनसः शान्तिं कुर्वन्तु मे सदा।। २०९।। यदिदं नागसंस्थानं कीर्तनाच्छ्रवणादपि। न तं सर्पा विहिंसन्ति न विषं क्रमते सदा ।। २१०।। गङ्गा पुण्या महादेवी यमुना नर्मदा नदी । गोमती ताप्ती काबेरी वरुणा देविका तथा ।। २११।। सर्वभूतपतिं देवं परमेशं महेश्वरम् । पूजयन्ति महानद्यः शिवसद्भावभाविताः ।। २१२।। शान्तिं कुर्वन्तु मे नित्यं तथा पापपरिक्षयम् । सिद्धिमाशु प्रयच्छन्तु सर्वविघ्न-

विवर्जितम् ॥ २१३॥ चन्द्रभागा महापुण्या नदी गोदावरी शुभा। सरयूर्गण्डकी श्रेष्ठा कौशिकी च सरस्वती ॥ २१४॥ इमा नद्यो महाभागाः शिवपादार्चने रताः। शान्तिं कुर्वन्तु मे नित्यं शिवध्यानैकमानसाः ॥ २१५॥ नैरञ्जना नाम नदी शोणश्चाऽपि महानदः। मन्दाकिनी च परमा तथा सन्निहिताः शुभाः ॥ २१६॥ इमाश्चाऽन्याश्च बहवो भुवि दिव्यन्तरिक्षगाः । रुद्रार्चनपरा नद्यः कुर्वन्तु मम शान्तिकम् ॥ २१७॥ महावैश्रणो देवो यक्षराजो महर्द्धिकः। यक्षकोटिपरीवारो यक्षसङ्घेन संयुतः ॥ २१८॥ महाविभवसम्पन्नो हरपादार्चने रतः। हरध्यानैकपरमो हरपादनतोत्तमः ॥ २१९॥ शान्तिं करोतु मे नित्यं पद्मपत्रायतेक्षणः। मणिभद्रो महानागो मणिरत्नविभूषणः ॥ २२०॥ मनोहरेण हारेण कण्ठलग्नेन राजते। यक्षिणीयक्षकन्याभिः परिवारितविग्रहः ॥ २२१॥ रुद्रार्चनपरो युक्तः करोतु मम शान्तिकम् । सुवीरो नाम यक्षेन्द्रो मणिकुण्डलभूषितः ॥ २२२॥ भालेन हेमपट्टेन शोभनेन विराजतः। बहुयक्षसमाकीर्णो यक्षैर्नमितविग्रहः ॥ २२३॥

शिवपूजापरो युक्तः करोतु मम शान्तिकम् । पञ्जिको नाम यक्षेन्द्रः कण्ठिका-कटिकोज्ज्वलः ॥ २२४॥ हारेण सुविचित्रेण केयूराभ्यां विराजितः । यक्षसंघैः समायुक्तो यक्षकोटिसमावृतः ॥ २२५॥ हरार्चनपरः श्रीमान् करोतु मम शान्तिकम्। धृतराष्ट्रो महातेजा यक्षाधिपसमः प्रभुः ॥ २२६॥ दिव्यपट्टांशुकच्छन्नो मणिकाञ्चनभूषितः। रत्नप्रदीप्तपट्टेन हेमेनाऽतिपरिष्कृतः ॥ २२७॥ यक्षकोटि-सहस्रेण परिवारेण संस्कृतः। रुद्रार्चनसमायुक्तः करोतु मम शान्तिकम् ॥ २२८॥ शिवभक्तः शिवं ध्यात्वा शिवपूजापरायणः । शिवप्रसादसम्पन्नः करोतु मम शान्तिकम् ॥ २२९॥ पूर्णभद्रो महायक्षः सर्वालङ्कारभूषितः । विरूपो यक्षराजेन्द्रः श्वेतवासा महाद्युतिः ॥ २३०॥ चारुकाञ्चनवर्णाभिः किङ्किणीभिः समन्वितः। भूषितश्च महाकायो वरदानैकतत्परः ॥ २३१॥ रुद्रपूजापरो भक्तः करोतु मम शान्तिकम्। अन्तरिक्षगता यक्षास्ते यक्षाः स्वर्गवासिनः ॥ २३२॥ गिरिकन्दर-दुर्गेषु ये यक्षा भूमिवासिनः । पाताले ये स्थिता यक्षाः शिवेप्यन्तःसमाहिताः ॥ २३३॥

नानारूपाऽऽयुधा यक्षा नानाभेषधरास्तथा । शिवभक्ताः सुमनसः शिवपूजा-
समुत्सुकाः ।। २३४।। शान्तिं कुर्वन्तु मे हृष्टाः शान्ताः शान्तिपरायणाः ।
यक्षिण्यो विविधाकारास्तथा यक्षकुमारिकाः ।। २३५।। यक्षकन्या महाभागाः
शिवपूजार्चने रताः। शान्ति-स्वस्त्ययनं क्षेमं बलं कल्याणमुत्तमम् ।। २३६।।
सिद्धिञ्चाऽऽशु प्रयच्छन्तु नित्यमेव समाहिताः। मेरुर्मन्दर-कैलासौ मलयो
गन्धमादनः ।। २३७।। श्रीपर्वतो महेन्द्रश्च हेमकूटस्तथैव च। पर्वता सर्वतः सर्वे
सर्वदा सुमहर्द्धिकाः ।। २३८।। शिवभक्ताः सदाकालं क्षेमं कुर्वन्तु मे सदा।
जम्बूद्वीपः प्लक्षद्वीपः शाल्मलीकुशद्वीपकौ ।। २३९।। क्रौञ्चद्वीपः शाकद्वीपो
गोमेदद्वीपको महान्। पुष्करस्तु महाद्वीप एते द्वीपा महारुचः।। २४०।। रुद्रभक्तिरताः
सर्वे शान्तिं कुर्वन्तु मे सदा। क्षारक्षीरोदकौ चैव दध्युदोऽथ घृतोदकः ।। २४१।।
सुरोदः स्वादुदश्चैव इक्षूदकस्तथैव च। सप्तसमुद्रनामानः कुर्वन्तु मम शान्ति-
कम् ।। २४२।। सागराः सरितः सर्वाः सागराः सर्वतः स्थिताः। रुद्रपूजापरा

नित्यं कुर्वन्तु मम शान्तिकम् ॥ २४३॥ राक्षसाः सर्वतः सर्वे राक्षसा घोररूपिणः। राक्षसा ये महावीर्या राक्षसाश्च महाबलाः ॥ २४४॥ स्थलस्था राक्षसा ये तु अन्तरिक्षे तु राक्षसाः। पाताले भूतले ये च नित्यं रुद्रपरायणाः ॥ २४५॥ शान्तिं कुर्वन्तु मे नित्यं सततं शिवभाविताः । भैरवं यस्य रूपं तु प्रेमभस्माऽवगुण्ठितम् ॥ २४६॥ तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा। नित्यमुज्ज्वलवेगेन योगिन्योऽथ महाबलाः ॥ २४७। रुद्राण्यो विविधाऽऽकारा डाकिन्यश्च महर्द्धिकाः । रुद्रप्रणामनिरता रुद्रपूजाऽर्चने रताः ॥ २४८॥ रुद्रैकाहितचेतस्काः कुर्वन्तु मम शान्तिकम् । अन्तरिक्षं गता याश्च डाकिन्यः सर्वसंस्थिताः ॥ २४९॥ पाताले यास्तु डाकिन्यो गिरिदुर्गेषु याः स्थिताः । तृतीयं लोचनं यस्य त्रिशूलं भस्म भासुरम् ॥ २५०॥ तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा। सर्वे भूता महारूपाः सर्वे भूता महोज्ज्वलाः ॥ २५१॥ सर्वे भूताः स्थिताः सौम्याः सर्वे भूता मनोजवाः। अन्तरिक्षे च ये भूता ये भूता दिवि

संस्थिताः ॥ २५२॥ पाताले भूतले ये तु भूता भूतविधायकाः। खट्वाङ्गं विमलं यस्य त्रिशूलं भस्म भासुरम् ॥ २५३॥ तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा। प्रेताः प्रीताः प्रेतगणा ये प्रेताः सर्वतोमुखाः ॥ २५४॥ अतिदीप्ताश्च ये प्रेता ये प्रेता रुधिराशनाः । अन्तरिक्षे च ये प्रेताः ये प्रेताः स्वर्गवासिनः ॥ २५५॥ पाताले भूतले प्रेता ये प्रेताः कामरूपिणः । स्मशाने निलयो यस्य वृषभो यस्य वाहनः ॥ २५६॥ तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा। ये पिशाचा महावीर्या ऋद्धिमन्तो महाबलाः ॥ २५७॥ नानारूपधराः सर्वे सर्वे च गुणविस्तराः। अन्तरिक्षे पिशाचा ये स्वर्गे ये च पिशाचकाः ॥ २५८॥ भू-पाताले पिशाचाश्च बहुरूपाः महोज्ज्वलाः । चन्द्रार्धं मस्तके यस्य गङ्गा पुण्यजटाधरः ॥ २५९॥ तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा। अपस्मारग्रहाः सर्वे सर्वे चाऽपि ग्रहा जवाः । गर्भबालग्रहा ये तु नानारोगा ग्रहाश्च ये ॥ २६०॥ अन्तरिक्षे ग्रहा ये तु स्वर्गे ये तु ग्रहोत्तमाः।

भू-पाताले ग्रहाः ये तु ये ग्रहाः सर्वतो दिशः ।। २६१ ।। कण्ठे यस्य महानीलं भूषणं यस्य पन्नगः। तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।। २६२।। एते देवादयः सर्वे शिवाऽऽज्ञानुपधायिनः। कुर्वन्तु जगतः शान्तिं शिवभक्ताश्च सर्वदा ।। २६३।। जपात्मयोगसंस्थाय जपसंशुद्धचेतसे । जपदानैकशूराय जपेशाय नमोऽस्तु ते ।। २६४।। जपोत्तमाय देवाय जपकल्याणधारिणे। जपप्रकट-देहाय जपजाप्याय ते नमः ।। २६५।। जय लक्ष्मीनिवासाय जय कान्तिविधायिने। जय वाक्यविशुद्धाय अजिताय नमो नमः ।। २६६।। जय त्रिशूलहस्ताय जय देवाङ्गधारिणे। जय निर्जितलोकाय जय रूपाय ते नमः ।। २६७।। जय कान्तार्ध-देहाय जय चन्द्राधारिणे। जय देवाधिवासाय जय रुद्राय ते नमः ।। २६८।। जय त्रिभुवनेशाय जय विख्यातकीर्तये। जय सर्वाविधाराय जय कर्त्रे नमो नमः ।। २६९।। जय मोक्षप्रदात्रे च सृष्टिसंहारकारिणे। ब्रह्मविष्णवीशवन्द्याय शिवशान्ताय

ते नमः ॥ २७० ॥ इत्येकं शान्तिकाध्यायं यः पठेच्छ्रुणुयादपि । सुधियः सुखतां यान्ति शिवलोके महीयते ॥ २७१ ॥ कन्यार्थी लभते कन्यां जपकामौ जपं लभेत् । अर्थकामो लभेदर्थं पुत्रकामस्तु तान् बहून् ॥ २७२ ॥ विद्यार्थी लभते विद्यां योगार्थी योगमाप्नुयात् । यो यान् प्रार्थयते कामान् मानवः श्रवणादिह ॥ २७३ ॥ तत्सर्वं शीघ्रमाप्नोति देवानां च प्रियो भवेत् । शान्त्यध्यायं पठेद्यस्तु संग्रामं प्रविशेन्नरः ॥ २७४ ॥ सुनिर्जित्याऽऽहवे शत्रून् कल्याणैः परिपूज्यते । अक्षय्यं मोदते कालमतिरस्कृतशासनः ॥ २७५ ॥ व्याधिभिर्नाभिभूयेत पुत्रपौत्रैः प्रतिष्ठितः । पाठ्यमानमिदं पुण्यं यमुद्दिश्य च पठ्यते ॥ २७६ ॥ न तस्य रोगा बाधन्ते वातपित्तादिसम्भवाः । नाऽकाले मरणं तस्य न सर्पैश्चाऽपि दंश्यते ॥ २७७ ॥ न विषं क्रमते देहे जडत्वं न च मूकता । न च सर्पभयं तस्य न च तस्य भयं भवेत् ॥ २७८ ॥ नाऽभिचारकृतो दोषो लिप्यते स कदाचन । यत् पुण्यं सर्वतीर्थानां गङ्गादीनां विशेषतः ॥ २७९ ॥ तत् पुण्यं कोटिगुणितं प्राप्नोति

श्रवणादिह। यज्ञानामश्वमेधानामग्निष्टोमशतस्य च।। २८०।। श्रवणात् फलमाप्नोति कोटिकोटिगुणोत्तरम् । अवध्यः सर्वभूतानामन्येषां च विशेषतः ।। २८१।। जीवेद्वर्षशतसाग्रं सर्वव्याधिविवर्जितः । गोघ्नश्चैव कृतघ्नश्च ब्रह्महा गुरुतल्पगः ।। २८२।। शरणागतघातश्च मित्रविश्वासघातकः । दुष्टपापसमाचारो मातृहा पितृहा तथा। श्रवणादस्य पाठाद् वा मुच्यते सर्वपातकैः ।। २८३।। शान्त्यध्यायमिदं पुण्यं न देयं यस्य कस्यचित् । शिवभक्ताय दातव्यं शिवेन कथितं पुरा ।। २८४।।

।। इति शिवधर्माख्ये–उपपुराणे नन्दिकेश्वरसंवादे शान्तिकाध्यायः समाप्तः शुभः ।।

* विसूचिका (कलेरा मन्त्र) *

ॐ ह्राँ ह्रीं रीं राँ विष्णुशक्तये नमः । ॐ नमो भगवति विष्णुशक्ते ह्येतम् । ॐ नय नय पच पच मथ मथ उत्सादय दूरे कुरु स्वाहा। हिमवन्तं गच्छ जीव सस चन्द्रमण्डलगतोऽसि स्वाहा–

इति मन्त्रो महामंत्रं न्यस्य वामकरोदरे। मार्जयेदातुराकारे तेन हस्तेन संयुतः ।।

यो मन्त्रले मन्त्रिएको जल विसूचिकाग्रस्त स्त्रीपुरुषलाई सेचन गरी प्याइदिए हैजा निको हुन्छ।